## द्वन्द्वमनोज्ञादिभ्यश्च । (१३३/१७९८)

द्वन्द्वसञ्ज्ञकेभ्यः[1] मनोज्ञादिभ्यश्च वुञ् प्रत्ययो भवति भावकर्मणोः[2] । गोपालपशुपालानां भावः कर्म वा गौपालपशुपालिका । शैष्योपाध्यायिका । कौत्सकुशिकिका । मनोज्ञादिभ्यः[3] – मानोज्ञकम् । काल्याणकम् ।

मनोज्ञ । कल्याण । प्रियरूप । छान्दस । छात्र । मेधाविन् । अभिरूप । आढ्य । कुलपुत्र । श्रोत्रिय । चोर । धूर्त । [4]वैश्वदेव । युवन् । ग्रामपुत्र । ग्रामखण्ड । ग्रामकुमार । अमुष्यपुत्र । अमुष्यकुल । शतपत्र । [5]कुशल । मनोज्ञादिः ॥

## गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु । (१३४/१७९९)

गोत्रवाचिनः चरणवाचिनः च प्रातिपदिकात् वुञ् प्रत्ययो भवति, प्रत्येकं भावकर्मणोरर्थयोः श्लाघादिषु विषयभूतेषु । तत्र श्लाघा विकत्थनम् । अत्याकारः [6]पराधिक्षेपः । तदवेतः तत्प्राप्तः [7]तज्ज्ञो वा । तद् इति गोत्रचरणयोः [8]भावकर्मणी निर्दिश्येते । तत्प्राप्तः तदवगतवान् तदवेत इत्युच्यते । श्लाघायां तावत् – गार्गिकया श्लाघते । काठिकया श्लाघते । गार्ग्यत्वेन कठत्वेन च विकत्थते इत्यर्थः । अत्याकारे – गार्गिकया [9]अत्याकुरुते । काठिकया [10]अत्याकुरुते । गार्ग्यत्वेन कठत्वेन च परानधिक्षिपति इत्यर्थः । [11]तदवेतः – गार्गिकामवेतः । काठिकामवेतः । गार्ग्यत्वं कठत्वं च प्राप्तः इत्यर्थः । [12]तद्वा अवगतवान् इत्यर्थः । श्लाघादिषु इति किम् ? गार्ग्यत्वम् । कठत्वम् ॥

## होत्राभ्यश्छः । (१३५/१८००)

होत्राशब्दः [13]ऋत्विग्विशेषवचनः । [14]ऋत्विग्विशेषवाचिभ्यः छः प्रत्ययो भवति भावकर्मणोः[15] । अच्छावाकस्य भावः कर्म वा अच्छावाकीयम् । [16]मित्रावरुणीयम् । ब्राह्मणाच्छंसीयम् । [17]आग्नीध्रीयम् । प्रतिप्रस्थात्रीयम् । त्वष्ट्रीयम् । पोत्रीयम् । बहुवचनं स्वरूपविधिनिरासार्थम् ॥

## ब्रह्मणस्त्वः । (१३६/१८०१)

होत्राभ्यः इत्यनुवर्तते । ब्रह्मन्शब्दाद् [18]होत्रावाचिनः त्वः प्रत्ययो भवति भावकर्मणोः[19] । छस्यापवादः । [20]ब्रह्मणो भावः कर्म वा ब्रह्मत्वम् । न इति वक्तव्ये त्ववचनं तलो बाधनार्थम् । यस्तु जातिशब्दो ब्राह्मणपर्यायो ब्रह्मन्-शब्दः, ततः त्वतलौ[21] भवत एव । ब्रह्मत्वम्, ब्रह्मता । [22]भवनावधिकयोर्नञ्स्नञोरधिकारः समाप्तः ॥

इति [23]काशिकायां वृत्तौ पञ्चमाध्यायस्य

प्रथमः पादः[24]

---

1. प्रातिपदिकेभ्यः इत्यधिकम् ब. फ. , 2. अर्थयोः इत्यधिकम् फ. ह, अभिधेययोः इत्यधिकम् कः 3. खल्वपि इत्यधिकम् क. ग. फ. ह. 4. विश्वदेव क. 5. कुशलपुत्र क, कुपुत्र ग्रामकुलाल ड. 6. पराधिकार. फ. 7. तज्ज्ञातः ड. 8. भावश्च कर्मच ब. क. 9–10. अधिकुरुते ड. 11. तदवेते ड. 12. तद्वान् गतवान् ह, तद्वारगतः इत्यर्थः क. 13. ऋत्विजां वाचकः ह. 14. होत्राभ्यः इत्यधिकम् ब. क. 15. अर्थयोः इत्यधिकम् ब, अभिधेययोः इत्यधिकम् क. ह. 16. मैत्रावरुणीयम् ग. 17. आग्नीध्रीयम् – पोत्रीयम् नास्ति ड. 18. होतृवाचिनः ह. 19. अर्थयोः इत्यधिकम् ब. ह. 20. ब्रह्माख्यस्य ऋत्विजो भावः कर्म वा ब्रह्मत्वम् क. ग. 21. प्रत्ययौ इत्यधिकम् ब. क. 22. भावकर्मणोः नञ्स्नञोश्च पूर्णोऽवधिः क. 23. श्री इत्यधिकम् क. ड. 24. समाप्तः इत्यधिकम् क.